# अथ मध्वाष्टकम्

1) अज्ञाननाशाय सतां जनानां कृतावताराय वसुन्धरायम् ।
मध्वाभिधानाय महामहिम्ने हतारिसंघाय नमोऽनिलाय ॥

2) येन स्वसिद्धान्तसरोजमद्धा विकासितं गोभिरलं विशुद्धैः।
दुस्तर्कनीहारकुलं च भिन्नं तस्मै नमो मध्वदिवाकराय ॥

3) प्रपन्नतापप्रशमैकहेतुं दुर्वादिवादीन्धनधूमकेतुम् ।
निरन्तरं निर्जितमीनकेतुं नमाम्यहं मध्वमुनिप्रकाण्डम् ॥

4) शान्तं महान्तं नतपातकान्तं कान्तं नितान्तं कलितागमान्तम् ।
स्वान्तं नयन्तं त्रिपुरारिकान्तं कान्तं श्रियो मध्वगुरुं नमामि ॥

5) पुन्नामनाम्ने मुरवैरिधाम्ने सम्पूर्णनाम्ने समधीतनाम्ने ।
संकीर्तिताधोक्षजपुण्यनाम्ने नमोऽस्तु मध्वाय विमुक्तिनाम्ने ॥

6) सन्मानसंसज्जनताशरण्यं सन्मानसन्तोषितरामचन्द्रं ।
सन्मानसव्यक्तपदं प्रशान्तं नमाम्यहं मध्वमुनिप्रकाशम् ॥

7) संस्तूयमानाय सतां समूहैः चन्द्रायमानाय चिदम्बुराशेः।
दीपायमानाय हरिं दिदृक्षोरलं नमो मध्वमुनीश्वराय ॥

8) गुणैकसिन्धुं गुरुपुङ्गवं तं सदैकबन्धुं सकलाकलापम् ।
मनोजबन्धोः श्रितपादपद्मं नमाम्यहं मध्वमुनिं वरेण्यम् ॥

9) मध्वाष्टकं पुण्यमिदं त्रिसन्ध्यं पठन्त्यलं भक्तियुता जना ये ।
तेषामभीष्टं वितनोति वायुः श्रीमध्वनामा गुरुपुङ्गवोऽयम् ॥

10) परमपुरुषश्रीचरणसरोरुहमधुकररूपकमानसमुदितम् ।
गुरुकुलतिलकश्रीमदानन्दतीर्थयोगिवरं सततं वन्दे ॥

11) श्रीमल्लिकुचवंशेन मध्वाष्टकमुदीरितम् ।
श्रीमत्त्रिविक्रमाख्येन गुर्वनुग्रहकारकम् ॥

इति कविकुलतिलक श्रीमत्त्रिविक्रमपण्डिताचार्यविरचितं श्रीमध्वाष्टकम् ॥